# Shri Gayatri Ashtakam 3

# શ્રીગાયત્ર્યષ્ટકમ્ ૩

## Document Information

Text title : gAyatryaShTakam 3

File name : gAyatryaShTakam.itx

Category : devii, aShTaka, gAyatrI, devI

Location : doc_devii

Proofread by : PSA Easwaran

Latest update : January 5, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# Shri Gayatri Ashtakam 3

# શ્રીગાયત્ર્યષ્ટકમ્ ૩

ઉષઃકાલગમ્યામુદાત્ત સ્વરૂપાં
    અકાર પ્રવિષ્ટામુદારાઙ્ગભૂષામ્ ।
અજેશાદિવન્દ્યામજાર્ચાઙ્ગભાજા-
    મનૌપમ્યરૂપાં ભજામ્યાદિ સન્ધ્યામ્ ॥ ૧॥

સદાહંસયાનાં સ્પુરદ્રત્નવસ્ત્રાં
    વરાભીતિહસ્તાં ખગામ્નાયરૂપામ્ ।
સ્ફુરત્સાધિકામક્ષમાલાં ચ કુમ્ભં
    દધાનામહં ભાવયે પૂર્વસન્ધ્યામ્ ॥ ૨॥

સ્ફુરચચન્દ્રકાન્તાં શરચ્ચન્દ્રવક્ત્રાં
    મહાચન્દ્રકાન્તાદ્રિપીનસ્તનાઢ્યામ્ ।
ત્રિશૂલાક્ષહસ્તાં ત્રિનેત્રસ્યપત્નીં
    વૃષારૂઢપાદાં ભજે મધ્યસન્ધ્યામ્ ॥ ૩॥

સદાસામગાનપ્રિયાં શ્યામલાઙ્ગીં
    અકારાન્તરસ્થાં કરોલ્લાસિ ચક્રામ્ ।
ગણાપદ્મહસ્તાં સ્વનત્પાઞ્ચજન્યાં
    ખગેશોપવિષ્ટાં ભજેમાસ્તસન્ધ્યામ્ ॥ ૪॥

પ્રગલ્ભસ્વરૂપાં સ્ફુરત્કઙ્કણાઢ્યાં
    સદાલમ્બમાનસ્તનપ્રાન્તહારામ્ ।
મહાનીલરત્નપ્રભાકુણ્ડલાઢ્યાં
    સ્ફુરત્સ્મેરવક્ત્રાં ભજે તુર્યસન્ધ્યામ્ ॥ ૫॥

હૃદમ્ભોજમધ્યે પરામ્નાયનીડે
    સુખાસીનસદ્રાજહંસાં મનોજ્ઞામ્ ।
સદાહેમભાસાં ત્રયીવિદ્યમધ્યાં
    ભજામસ્તુવામો વદામઃ સ્મરામઃ ॥ ૬॥

સદાતત્પદૈઃ સ્તૂયમાનાં સવિત્રીં
    વરેણ્યાં મહાભર્ગરૂપાં ત્રિનેત્રામ્ ।
સદા દેવદેવાદિ દેવસ્યપત્ની-
    મહન્ધીમહીત્યાદિ પાદૈકજુષ્ટામ્ ॥ ૭॥

અનાથં દરિદ્રં દુરાચારયુક્તં
    શતં સ્થૂલબુદ્ધિં પરં ધર્મહીનમ્ ।
ત્રિસન્ધ્યં જપધ્યાનહીનં મહેશિ
    પ્રપન્નં ચ માં પાલય ત્વં કૃપાલો ॥ ૮॥

ઇતીદં ભુજઙ્ગં પઠેદ્યસ્તુ ભક્ત્યા
    સમાદાય ચિત્તે સદા તાં પરાં ચ ।
ત્રિસન્ધ્યાસ્વરૂપાં ત્રિલોકૈકવન્દ્યાં
    સ મુક્તો ભવેત્સર્વપાપૈરજસ્રમ્ ॥ ૯॥

ઇતિ શ્રીગાયત્ર્યષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Gayatri Ashtakam 3*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*